- Title – ~~दर्शन~~ अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 4/8
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – श्रीमते रामानुजाय नमः रमाख्येति
- End – सकल साध्य प्रतियोगिता का भावतोप्यनुज्ञाना
- Colophon-
- Illustrations -
- Source -
- Subject - दर्शन
- Revisor -
- Author - अज्ञात
- Remarks- अपूर्ण है।

Saloni

जो॰ १
पा॰ २

श्रीमते रामानुजाय नमः समारब्धेति समारब्धं यदनुमानं प्रामाण्यपरी
क्षणं तत्कारणीभूतं व्याप्तिज्ञानं प्रतिपादनं तान्निदानं व्याप्तिस्वरूपनि
रूपणमित्यर्थः अव्याप्यवृत्तीति कपिसंयोगी एतत्त्वादित्यर्थः इदं च ये
न रूपेण येन संबंधेन साध्यत्वं तदवच्छिन्नप्रतियोगिताकसाध्याभावस्य
प्रवेशमाहत्य अन्यथाव्याप्यवृत्तिसाध्यकस्थले विशिष्टाभावादिकमा
दाय दोषो बोध्यः अव्याप्यवृत्तिसाध्यके व्या[illegible] काद्यौ द्वेतौ अव्या
प्यभावादाह सद्धेताविति वृत्तिमद्धेतावित्यर्थः न तु साध्यवद्भिन्नो यः सा
ध्याभाववान् इति तदर्थे साध्याभावपदमित्यत्र वैयर्थ्यं साध्यवद्भिन्नावृत्तित्व
स्यैव सम्यक्त्वात् न चावृत्तित्वेपि समं साध्यवद्भिन्नस्यान्वयाविवक्ष
णात् साध्याभाववता समं तादात्म्येन तस्यान्वयात् न वैयर्थ्यमिति वा
च्यम् तथापि साध्यवद्भिन्नात्मको यः मनुवर्पहितं पीतदवृत्तित्वस्यैव

व
राम
१

ग्रा. प. १२ दि. 3

साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छेदकीभूतसंबंध
वाद्यासंबंधेन वन्ह्यादिमतोऽन्यस्मिन्पर्वतादौ वर्तते यः समवायसंबंधाव
च्छिन्नवन्ह्याद्यभाव स इति धूमादेः सत्वाद् व्याप्तिः स्यादत स्तदुपात्तमिति
नव्याः केचित्तु व्याप्यवृत्तित्वाव्याप्यवृत्तित्व[illegible]रूपविरुद्धधर्मसत्त्वात्संयोगा
द्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदो ननु गगनाद्यभावस्यापि माना
भावात् तथा च साध्यवद्भिन्नवृत्ति गगनाद्यभाववति धूमादेः सत्वाद् व्या
प्तेरतः साध्यपदमित्याहुस्तन्मंदं गुणे गगनाद्यभावे गुणत्वसामानाधिक
रण्यं नष्टद्रव्ये गगनाद्यभावे तथात्वमित्यादिप्रतीत्या गगनाद्यभावस्यापि
गुणत्वसामानाधिकरण्ये तदन्यावयोर्विरुद्धधर्मयोः संभवादिति दिक्
न च घटत्वघटाकाशसंयोगान्यतराभाववान् गमनत्वादित्यत्राव्याप्तिः

५

सम्पृक्तत्वात्साध्याभावपदवैयर्थ्यापत्तेश्चात् अतः सप्तमीसमासं समर्थयन्ना
चे साध्यवद्भिन्न इति तथाच साध्यवद्भिन्नस्य वृत्तावनन्वयापत्तेः सप्तमीत्वे
हेतुवैयर्थ्यम् साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणेन अव्याप्यवृत्तिसा
ल ध्यकसंग्रहार्थमेवेत्याशयः साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति गुणादेः सत्त्वा
त्तत्राव्याप्तिसंभवो वा स्यादतः साध्याभावेति न च कपिसंयोगी एतत्त्वादित्यादेः पि
संग्रहार्थमधिकरणभेदेनाभावभेदमाश्रित्यैव लक्षणमिदं कार्यं तथा
च साध्यवद्भिन्नो योऽभावस्तद्वृत्तित्वस्यैव सम्पृक्तत्वात्साध्यपदं व्यर्थ
मिति वाच्यम् प्रतियोगितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य विशे
षणाभावत्वेनापीति तद्वैयर्थ्यशंकानवकाशात् वस्तुतस्तु प्रतियोगितावच्
छेदकसंसर्गेण साध्यवद्भिन्नेवृत्तित्वेः साध्याभावच्छेदकसंबंधेन यः सा
ध्यीयोऽभावस्तद्वृत्तित्वमित्यर्थः तथा च साध्यतावच्छेदकसंबंधेन

जा॰
२

ननु सकलस्य साध्याभावस्यैकाधिकरणाप्रसिद्ध्याऽव्यभिचारित्वघटितव्याप्ति
घटकसाध्याभावस्य विशेषणत्वं साकल्यं तच्च वह्निमान् धूमादित्यादि
सद्धेतावव्याप्तिः तत्रापि तत्तद्रूपदार्थवृत्तित्वावच्छिन्नाभावस्य तत्तत्
पदार्थवृत्तित्वावच्छिन्नाभावत्वरूपस्य वा साध्यप्रतियोगिताकाभावत्वा [illegible]
स्याधिकरणाप्रसिद्धेरत आह साकल्यं साध्याभाववतीति तथा च सा
कल्यं न साध्याभावविशेषणं किं तु मतौ नाप्रसिद्धिरिति भावः धूमवान् वह्नेरि
त्यादावव्यभिचारित्वघटितव्याप्तिः साध्याभाववद्वृत्तिः किंचिद्व्यक्तिनिष्ठाभा-
वप्रतियोगित्वात् अतः साध्याभाववतीति नन्वेवमपि साध्याभावव-
न्निरूपितान्तर्गते महानसादौ वर्तमानस्याभावस्य प्रतियोगित्वं धूमादौ ना
स्तीत्यव्याप्तिर्नादवस्थमतमत आह साध्येवेति तथा च यत्र महान-
सादिर्न सकलसाध्याभाववानित्यदोषः सा च साव्यभिचारित्वघटि

राम
२

साध्यवद्भिन्ने पटे वर्तमानस्य गगनादिसंयोगात्मकसाध्याभावस्यापि।
कत्वे गगनत्वहेतोः सत्वादिति वाच्यम् अभावाभावस्यातिरिक्ततामत
एव एतल्लक्षणकरणादिति भावः भिन्नत्वमिति द्रव्यनिष्ठसंयोगाभाव
तोभिन्नत्वस्य हेत्वर्थः मानाभावादिति तथाच व्याप्यवृत्तिसाध्यकसद्धेता।
वव्याप्तिरिति भावः हेतोरिति नचसाध्यवत्प्रतियोगिकान्योन्याभाव
स्य केवलान्वयित्वादसंभव एव कुतश्चित्तो नाव्याप्तिरिति वाच्यम् व
ह्निमान् गगनादित्यत्र वृत्ति गगनादिहेतौ लक्षणसंभवात् तस्यापि सद्धे।
मेव तुत्वाभाः स्वरूपैव स्वमाणत्वादिति भावः साध्यपदस्य सिद्धिकर्मतात।
व्यक्तिपरतया तत्तत्साध्यवद्भिन्नप्रतियोगिताकान्योन्याभावासामा।
नाधिकरणरूपस्य पर्यवसितार्थस्य द्रव्यं पृथिवीत्वादित्यादावेवल ६
क्षणसंभवात् कुं पर्वतीयपृथ्वीत्वादित्यादावव्याप्तिकस्य नमित्यपि चे ५

व

गेनतमं सकलसपक्षकर्मधारयोऽप्यनुपपन्न अत आह साध्याभावोवे

ति तथा च साध्याभाववत्त्वेव साकल्यं विशेषणत्वेनान्वेतीति भावः

साध्याभाववति साकल्यस्यान्वयो न स्यादत आह तेनेति विपक्षैकदेशः कश्चिद्वि

पक्षः साध्यनिष्ठसाकल्यस्य साध्याभाववद्वृत्तित्वावच्छिन्नाभावस्यैवाति

व्याप्यः फलमाह नवेति एकव्यक्तिसाध्यके सकलसाध्याभाववदप्रसि

द्धासिद्धेर्व्याप्त्यव्याप्तिरित्याशयेन न नानेत्युक्तम् अव्याप्यवृत्तीति कपिसं

योगी एतत्त्वादित्यादावित्यर्थः पचपक्षे हेत्वभावस्याप्रसिद्धतिमीति वैय

धिकरण्यावच्छेदकावच्छिन्नस्यैवानिवेशः कालीयपरत्वमव्याप्यवृत्तिहेता

व्याप्तिः संभवति तथापि यथाश्रुतमूलस्य न तत्र व्याप्तिरित्याशयेनेदमपि कं

व्याप्यवृत्तिहेतुकैः व्यभिचारीतीति एतद्वृत्त्यभाववान् कपिसंयोगादि

त्यादावित्यर्थः अभाववद्वृत्तीति साध्याभावे हेत्वभावे वेत्यर्थः अत

प्रा० ६

7

राम ६

व्याप्तिघटकोयं साध्याभाववद्वृत्तित्वे विशेषणे दत्ते एतन्नाप्येतावत्त
मव्याप्तिवारकत्वमसार्थकं भवति अतः साध्याभाववद्वृत्तित्वे च साकल्यं
साकल्यं योजयंति साकल्यमित्यादिनेत्यवतारयंति तत्रोक्तं साध्याभा
ववृत्ति साकल्याव्रताविति व्याप्तिवारकत्वेन साध्ये साकल्यविशेष
णस्य प्रथमतः सार्थक्यसंभवात् अन्यथा गगनाववृत्ति धर्मवान् द्रव्य
त्वात् इत्यादौ घटत्वादिवारणेन तत्र साध्याभाववद्वृत्तित्वादिति का
भावमतियोगि निद्रव्यत्वादावतिप्रसंगादिति चेन्न इत्यत आह यतः साध्ये
साकल्यविशेषणोपादाने गुणत्वादेरपि संग्रहाज्जदभाववन्नाल्गुणादिः
किं तु गगनमात्रमेव तत्र हेतोर्वृत्तित्वान्नातिव्याप्तिः ननु साध्यवत्त्व पिहि
त्वावच्छिन्नप्रतियोगिताकस्य साध्याभावस्य सत्त्वादसंभवः किं च स
कलपदोपादानेनापि सकलसाध्यप्रतियोगिताकाभाववत्तोप्यनुपपत्तानां